"इत्यश्वाहमहमहमिकया तयोर्विवदतोः"।)

अहम्पूर्व्विका, स्त्री, (अहं पूर्व्वं अहं पूर्व्वमिति कथनं यत्र। अहम्पूर्व्व+ठन्+स्वार्थे कन्+ततष्टाप्।) अहम्पूर्व्वं अग्रे भवामि अहं पूर्व्वं अग्रे भवामि इत्यन्योऽन्यं योधानां धावनक्रिया। इत्यमरः। आमि अग्रे याव बलिया योद्धा दिगेर परस्पर आगे धाओया इति भाषा। (यथा किराते,—

"सुगेषु दुर्गेषु च तुल्यविक्रमै-
र्जवादहम्पूर्व्विकया यियासुभिः"।)

अहम्मतिः, स्त्री, (अहंप्रधाना मतिर्ज्ञानं।) अविद्या। अज्ञानं। इत्यमरः॥

अहर्गणः, पुं, (अह्नां गणः) मासः इति हारावली। ग्रहाणां मध्यादिज्ञानार्थं श्वेतवाराहकल्पावधि-सृष्ट्यवधिब्रह्मसिद्धान्तोक्तकल्पावधिकल्याद्यब्दावधि वा इष्टकालपर्य्यन्तं परिगणितदिनसमूहः। तत्पर्य्यायः। द्युवृन्दं २। दिनौघः ३। द्युगणः ४। दिनपिण्डः ५। इति ज्योतिःशास्त्रम्॥

अहर्ज्जरः, पुं, (अहोभिर्लोकान् जरयति। अहन्+जॄ+णिच+अच्। यद्वा अहानि जीर्य्यन्त्यन्तर्भवन्त्यस्मिन्। अहन्+जॄ+अच्।) संवत्सरः। यथा। "यथापः प्रवता यन्ति यथा मासा अहर्ज्जरं। एवं मां ब्रह्मचारिणः धातरायन्तु सर्व्वतः स्वाहा"। इति तैत्तिरीयोपनिषदि शिक्षावल्ली॥ यथा लोके आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति। यथा वा मासा अहर्ज्जरं संवत्सरोऽहर्ज्जरोऽहोभिः परिवर्त्तमानो लोकान् जरयतीति अहानि वा अस्मिन् जीर्य्यन्ति अन्तर्भवन्ति इत्यहर्ज्जरः। तञ्च यथा मासा यन्ति एवं मां ब्रह्मचारिणः हे धातः सर्व्वस्य विधातः मामायन्तु सर्व्वतः सर्व्वदिगभ्यः। इति शङ्कराचार्य्यकृतभाष्यम्॥

अहर्पतिः, पुं, (अह्नः पतिः। पक्षे अहःपतिः।) सूर्य्यः। इत्यमरः। (यथा रघुवंशे १०। ५४।

"द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम्"।)

अहर्ब्बान्धवः } **अहर्म्मणिः** } पुं, (अह्नो बान्धवः। अह्नो मणिरिव च।) सूर्य्यः। इति हेमचन्द्रः। अर्कवृक्षः।

अहर्मुखं, क्ली, (अह्नो मुखं।) प्रत्यूषः। इत्यमरः॥

अहल्यः, त्रि, (हलेन हल्यं। ततो नञ्समासः।) हलानाकृष्टक्षेत्रादिः। अकृष्टभूमिः॥

अहल्या, स्त्री, अप्सरोविशेषः। (यथा हरिवंशे।

"दिवोदासस्य राजर्षिरहल्या च यशस्विनी।
शरद्वतस्य दायादमहल्या समसूयत"॥

गौतममुनिपत्नी। इति मेदिनी॥ सा च महासाध्वी। प्रातः काले तस्यानामस्मरणे महापातकनाशो भवति। यथा पुराणं,—

"अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा।
पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनं"॥

सत्ययुगे इन्द्रः गौतमरूपधारणं कृत्वा तस्याः सतीत्वं नाशितवान्। ततो गौतमशापेन सा पाषाणदेहा बभूव। ततस्त्रेतायुगे श्रीरामचन्द्रस्य पादस्पर्शात् शापात् विमुक्ता सती पुनः पूर्व्वरूपा मानवी भूता। इति रामायणम्॥

अहस्करः, पुं, (अहः करोति। अहन्+कृ+ट। कस्कादित्वात् सः।) सूर्य्यः। इति हेमचन्द्रः। अर्कवृक्षः॥

अहस्पतिः, पुं, (अह्नः पतिरिव।) सूर्य्यः। इत्यमरः। अर्कवृक्षः। अमरे तत्पर्य्याये अर्काह्व इति दर्शनात्॥

अहह, व्य, (अहं जहातीति। अहम्+हा+ड। पृषोदरादित्वात्मलोपः।) अद्भुतं। खेदः। परिक्लेशः। प्रकर्षः। सम्बोधनं। इति मेदिनी॥ (आश्चर्य्यं। विस्मयः। यथा हितोपदेशे।

"अहह! महापङ्के पतितोऽसि"।

"अहह! तात! पयास्व दारुणा'।

इति महानाटके॥)

अहहा, व्य, (अहं जहातीति। अहम्+हा+क्विप्। पृषोदरादित्वात् साधुः।) अद्भुतं। खेदं। इत्यमरटीकायां रायमुकुटादयः। अत्र अहहशब्दार्थोऽपि द्रष्टव्यः॥

अहार्य्यः, पुं, (हृ+ण्यत्। ततो नञ्समासः।) पर्व्वतः। इत्यमरमेदिन्यौ॥

अहार्य्यं, त्रि, (न हार्य्यं। नञ्समासः।) हर्त्तुमशक्यं। अहर्त्तव्यं। अहरणीयं। इति मेदिनी॥

("अहार्य्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः"
"तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः"॥
इति च मनुः ९। १८९।)

अहिः, पुं, (आहन्तीति। आ+हन्+इण्। हन हिंसागत्योः। आङि श्रिहनिभ्यां ह्रस्वश्चेति इण्। स च डित्। डित्वात् टिलोपः। आङो ह्रस्वश्च।) वृत्रासुरः। सर्पः। इत्यमरः। सूर्य्यः। पथिकः। राहुः। इत्यनेकार्थध्वनिमञ्जरी॥ (सीसकं। राहुः। वप्रः। श्लेष्मानत्तनं। खलः। "विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः। यदहिर्नकुलद्वेषी सकुलद्वेषी पुनः पिशुनः"। इति वासवदत्तायाः प्रस्तावनाश्लोकः।)

अहिंसा, स्त्री, (न हिंसा। नञ्समासः।) कुलिकवृक्षः। कुलेखाड़ा इति ख्याता। अस्या गुणाः। विषरोगशोधनाशित्वं। इति राजवल्लभः॥ (कोकिलाक्षशब्देऽस्या गुणादयो ज्ञेयाः। हिंसा रहिते, त्रि।)

अहिका, स्त्री, (न+हा+डिक्+टाप्।) शाल्मलीवृक्षः। इति शब्दचन्द्रिका॥

अहिकान्तः, पुं, (अहेः सर्पस्य कान्तः प्रियः। भक्ष्यत्वात्।) वायुः। इति हेमचन्द्रः॥

अहिच्छत्रः, पुं, (अहेः छत्रः फणा इव छादकः।) देशविशेषः। तत्पर्य्यायः। प्रत्यग्रथः २। मेषशृङ्गीवृक्षः। इति हेमचन्द्रः॥

अहिच्छत्रा, स्त्री, शर्करा। इति राजनिर्घण्टः। चिनि इति भाषा। पुरीविशेषः। इति ज्योतिस्तत्त्वं॥ तथा वृद्धगार्ग्यः। "केशवमानर्त्तपुरं पाटलीपुत्रं पुरीमहिच्छत्रां। दितिमदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणं"। इति ज्योतिस्तत्त्वं॥

अहिजित्, पुं, (अहिं सर्पं वृत्रासुरं वा जितवान्। अहि+जि+क्विप्।) विष्णुः। कालीयनागदमनात्॥ इन्द्रः। वृत्रासुरनाशनात्॥

अहितः, त्रि, (न हितः। नञ्समासः।) शत्रुः। इत्यमरः। (यथा रघुवंशे ४। २८॥

"स ययौ प्रथमं प्राचीं तुल्यः प्राचीनवर्हिषा।
अहिताननिलोद्धूतैस्तर्ज्जयन्निव केतुभिः"।)

अपथ्यं इति शब्दचन्द्रिका॥

("एकान्ताहितानि दहनपचनमारणादिषु प्रवृत्तान्यमिश्राणि विषादीनि।" इति सुश्रुते।

प्रतिकूलः। अशुभकरः। यथा वैराग्यशतकं।

"लोकस्तथाप्यहितमाचरतीति चित्रम्"। १५।

"परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः।
अहितो देहजो व्याधिर्हितमारण्यमौषधं"॥ इति हितोपदेशे। अहिताहारोपयोगिनां पुनः कारणतो न सद्यो दोषवान् भवत्यपचारः, नहि सर्व्वाण्यपथ्यानि तुल्यदोषाणि न च सर्व्वे दोषास्तुल्यबलाः। नच सर्व्वाणि शरीराणि व्याधिक्षमत्वे समर्थानि। तदेव ह्यपथ्यं देशकालसंयोगवीर्य्यप्रमाणातियोगात् भूयस्तरमपथ्यं सम्पद्यते॥ स एव दोषः संसृष्टयोनिर्विरुद्धोपक्रमो गम्भीरानुगतः प्राणायतनसमुत्थो मर्म्मोपघाती वा भूयान् कष्टतमः क्षिप्रकारितमश्च सम्पद्यते इति चरकः।

"इह खलु यस्माद्द्रव्याणि स्वभावतः संयोगतश्चैकान्तहितान्येकान्ताहितानि हिताहितानि भवन्ति"। "एकान्ताहितानि दहनपचनमारणादिषु प्रवृत्तान्यमिश्राणि विषादीनि।"

"दुग्धस्यैकान्तहिततां विषस्यैकान्ततोऽहि तं
एव युक्तरसाद्येषु द्रव्येषु सलिलादिषु॥
एकान्तहिततां विद्धि वत्स! सुश्रुत! नान्यथा"॥

"विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः।
तान्येकान्ताहितान्येव शेषं विद्याद्धिताहितं"॥
इति सुश्रुतः॥)

अहितुण्डिकः, पुं, (अहेः तुण्डं मुखं, तेन दीव्यति यः सः। अहितुण्ड+ठक्। संज्ञापूर्व्वकत्वात् वृद्ध्यभावः।) भिक्षार्थं सर्पखेलकः। तत्पर्य्यायः। व्यालग्राही २। इत्यमरः। साप्‌ड़े इति भाषा॥

अहिद्विट्, [ष्] पुं, (अहिं वृत्रासुरं सर्पं वा द्वेष्टि यः। अहि+द्विष्+क्विप्।) इन्द्रः। गरुड़ः। मयूरः। नकुलः। इति मेदिनी॥

("अहिद्विषस्तद्भवता निशम्यतां"। इति माघे।

"एकाहिरत्नार्थमहिद्विषेऽद्य
दत्तो मयात्मेति यथा ब्रवीति"।
इति नागानन्दे॥)

अहिनकुलता } **अहिनकुलिका** } स्त्री, अहिनकुलयोर्वैरं। नित्यविरोधितेति यावत्। अहिश्च नकुलश्च अहिनकुलौ तयोर्भाव इति भावार्थे तण्वकप्रत्ययोः स्त्रियामाप् निष्पन्ना॥

अहिपुत्रकः, पुं, (अहेः सर्पस्य पुत्रक इव। सर्पाकारत्वात्।) नौकाविशेषः। तत्पर्य्यायः। पोतः २ तरालुः ३। इति हारावली॥